# मम पुस्तकम्

नाम - ____________________

पत्र-सङ्केतः - ____________________

____________________

चल-दूरवाणी-सङ्ख्या - ____________________

### वार्तालापाय

सामान्यतया वयम् अवगच्छामः यत् **‘आपदा’** इति अत्यन्तं कष्टदायिनी स्थितिः भवति, या अकस्मात् एव आगच्छति। प्रदत्तेषु चित्रेषु कीदृश्यः आपदाः दर्शिताः ? किं भवान्/भवती कदापि एतादृशीः आपदाः अनुभूतवान्/अनुभूतवती ?





# ८ विभिन्नाः आपदाः

## वयं ज्ञास्यामः

- धारितायाः मापनम् (मि.ली. परिमितं, लीटर परिमितम्)
- गुणन-विभजनद्वारा दैनिकसमस्यानां समाधानम्

## वयं दृष्ट्वा पठामः -



दावानलः



प्लावनम्



भूकम्पः



रेल-दुर्घटना




रोगि-वाहनम्



अग्निशामक-वाहनम्



विद्रावः



सहायता-शिविरम्

**शिक्षक-निर्देशः -** चित्राणाम् अधः लिखितान् शब्दान् अङ्गुलिनिर्देशद्वारा शिक्षकः सहभागिनः पाठयेत्, अपि च पठितुं प्रेरयेत् । सर्वेऽपि विभिन्नानाम् आपदानां विषये परस्परं चर्चां कुर्युः, स्व-अनुभवान् च वदेयुः ।

## मिलित्वा पठाम:-

# भूमि: यदा कम्पिता

यदा अहं गणतन्त्रदिवसस्य कार्यक्रमे व्यस्त: आसम्, तदा अकस्मात् एव भूमे: कम्पनम् आरब्धम् । सर्वे जना: कोलाहलपूर्वकम् इतस्तत: धावितुम् आरब्धवन्त: । सर्वे अपि अतीव भयभीता: आसन् । क्षणेन एव अनेकानि अपि भवनानि पतितानि । सर्वेषां सम्पूर्ण-वस्तूनि नष्टानि ।





बहूनां जनानां शारीरिक-अङ्गानि क्षत-विक्षितानि । अस्या: घटनाया: सञ्चारमाध्यमेन प्रचार: जात: । एतां घटनाम् अवगत्य सहायतार्थम् अनेके जना: शीघ्रमेव तत्र आगतवन्त: । ते पीडितजनानां स्थितिम् अवगत्य तत्र कार्यं कर्तुम् आरब्धवन्त: । पीडितजनानां कृते भोजनवासादीनां व्यवस्थाम् अपि कृतवन्त: ।

ग्रामीणाः जनाः अपि तेषां सहायकानां सहयोगार्थम् आगतवन्तः । एषा गुजरातप्रदेशस्य भुजनगरस्य घटना आसीत् । तस्मिन् काले बहुशैत्यम् आसीत् ।



बहिः गन्तुम् अपि न शक्यते स्म । भूकम्पस्य आशङ्कया, कदा पुनः भूकम्पः भवेत्, इति चिन्तनेन निद्रा अपि न आयाति स्म ।



एवमेव अनेकानि दिनानि व्यतीतानि । पुनः शनैः शनैः जनाः स्वस्थाः जायमानाः आसन् । अनन्तरं केचन अभियन्तारः (इंजीनियर) तत्र आगत्य गृहनिर्माणविषये बोधितवन्तः, कथं गृह-निर्माणं कुर्मः येन भूकम्पेन न्यूना हानिः भवेत् इति । तदा सर्वे अपि तेषां कथनानुसारेण भूकम्परोधीनि गृहाणि निर्मितवन्तः । कतिपयवर्षानन्तरं सम्पूर्णः ग्रामः पूर्ववत् सुन्दरः अभवत् ।



*स्रोतः – आसपास कक्षा ५, रा.शै. अ. प्र. प.*

**शिक्षक-निर्देशः –** शिक्षकः यदा एतं पाठं पाठयेत् तदा भुजनगरस्य भूकम्पविषये सहभागिनः बोधयेत् । भूकम्पात् जायमानानां प्रभावाणां विषये अपि चर्चां कर्तुं प्रेरयेत् । शिक्षकः सहभागिनः पृच्छेत् यद् ते कदापि भूकम्पस्य अनुभवं कृतवन्तः न वा इति । यदि कृतवन्तः तर्हि कीदृशीः समस्याः अनुभूतवन्तः ? प्राणिसम्पत्ति-आदीनां कियती हानिः इति ?

## चिन्तयित्वा वदन्तु –

**प्रश्नः १.** भूकम्पकाले यदा जनानां गृहाणि नष्टानि, तदा तेषां कृते कीदृश्याः सहायतायाः आवश्यकता भवेत् ?

**प्रश्नः २.** विचारयन्तु, यदि भवतः/भवत्याः नगरे कदाचित् भूकम्पः आगच्छेत्, तेन भवतः/भवत्याः गृहम् अपि नष्टं भवेत्, तर्हि भवान्/भवती कुत्र स्थास्यति ?

**प्रश्नः ३.** भवन्तः भूकम्पकाले स्वगृहे पालितानां पशूनां रक्षणं कथं करिष्यन्ति ?

**प्रश्नः ४.** किं भवान्/भवती कदापि अनावृष्टिः, भूकम्पः प्लावनं च इत्येतासु काम् अपि प्राकृतिकीम् आपदाम् अनुभूतवान्/अनुभूतवती ? तर्हि स्व-अनुभवान् श्रावयतु।

**प्रश्नः ५.** प्राकृतिक-आपदानां विषये मनुष्येण प्रकृत्या सह कृतः दुर्व्यवहारः एव दोषी वर्तते इति अस्मिन् विषये भवन्तः किं चिन्तयन्ति ? एतादृश्याः कस्याः अपि एकस्याः आपदायाः सन्दर्भे स्वमित्रैः सह चर्चां कुर्युः। चर्चायां निष्कर्षरूपेण प्राप्तान् मुख्यबिन्दून् लिखन्तु।

## भूकम्पात् रक्षितुं के के उपायाः सन्ति ?

### १. यदि भवान्/भवती गृहस्य अन्तः अस्ति तर्हि

- खट्वायाः अथवा सुदृढ-उत्पीठिकायाः अधः तिष्ठेत्।
- यदि खट्वा-उत्पीठिकादयः न स्युः, तर्हि स्वस्य शिरः बाहुभ्याम् आच्छादयेत्।
- काच-वातायन-द्वारेभ्यः दूरम् एव तिष्ठेत्।

### २. यदि भवान्/भवती गृहस्य बहिः अस्ति तर्हि

- उन्नतभवनेभ्यः वृक्षेभ्यः मार्गदीपेभ्यः विद्युत्-तन्त्रीभ्यः च दूरम् एव तिष्ठेत्।

### ३. यदि भवान्/भवती चलति वाहने अस्ति तर्हि

- यावत् शक्यं यानं स्थगयित्वा यानस्य अन्तः एव तिष्ठेत्।

### ४. यदि भवान्/भवती भूकम्पेन पातिनानां गृहाणाम् अन्तः अस्ति तर्हि

- अग्निं न ज्वालयेत्।

- स्वमुखं वस्त्रेण आच्छादयेत्।
- समीपस्थां नलिकां भित्तिं वा ताडयेत्, येन भवन्तम् अन्वेष्टुं सारल्यं स्यात्।



भूकम्पकाले कस्यचित् सुदृढवस्तुनः अधः स्थातुं किमर्थं वदन्ति ?

## आपदायाः समये सम्पर्क-सूचना

यदि काचित् आपदा आगच्छति तर्हि तस्याः सहायतायै समीपस्थस्य आरक्षकालयस्य, अग्निशामककेन्द्रस्य चिकित्सालयस्य च पत्रसङ्केतं दूरवाणी-संख्यां च अन्विष्य लिखेत् स्मरेत् च।

| | पत्रसङ्केतः | दूरभाषा-संख्याः |
|---|---|---|
| अग्निशामककेन्द्रः | | |
| समीपस्थः चिकित्सालयः | | |
| रोगि-वाहनम् | | |
| आरक्षकालयः | | |

## मम शब्दाः

**शिक्षक-निर्देशः –** 'विभिन्नाः आपदाः' इति विषयम् आश्रित्य सहभागिनः परस्परं चर्चां कुर्युः । शिक्षकः सहभागिनः पृष्ट्वा एतद्-विषयसम्बद्धान् त्रि-चतुर्-शब्दान् लेखितुं प्रेरयेत् । एते शब्दाः तेषां मातृभाषायाः अपि स्युः । यथा – भूकम्पार्थम् – भू-डोल इत्यादयः । सहभागिनः याः आपदाः अनुभूतवन्तः, तद्विषये ते चित्राणाम् अथवा भित्तिपत्राणां निर्माणं कुर्युः ।

## सहायता

- सर्वकारेण भूकम्पपीडितानां कृते सहायता-शिविरे भोजनस्य व्यवस्था कृता । तत्र एकः पाचकः पञ्चविंशतेः जनानां भोजनं पचति । यदि सहायता-शिविरे चत्वारः पाचकाः स्युः, तर्हि ते कतीनां जनानां कृते भोजनं पचेयुः ?
- भूकम्पकाले एकस्मिन् रोगि-वाहने पञ्चानां जनानाम् उपवेशन-व्यवस्था भवति । पञ्चाशत् जनानां कृते कति-वाहनानाम् आवश्यकता भविष्यति ?

## धारितायाः मापनम्

पीडितेभ्यः भोजन-जलकूपी-दुग्धादीनां वितरणम् अपि कृतम् । जलकूप्यः विभिन्नेषु आकारेषु आसन् । काचन लघ्वी, काचन दीर्घा, काचन दीर्घतरा । तासु कति-लीटरपरिमितं जलम् आयाति इति तत्र लिखितम् आसीत् ।



१ लीटर

७५० मि.ली. (पादोनलीटरपरिमितम्)



५०० मि.ली. (अर्धलीटरपरिमितम्)

२५० मि.ली. (एकपादलीटरपरिमितम्)

(१ लीटर = १००० मि.ली.)

- १ लीटरपरिमितां कूपीं पूरयितुं ५०० मिलीलीटरपरिमितानां कतीनां कूपीनाम् आवश्यकता भविष्यति ?
- २ लीटरपरिमितां कूपीं पूरयितुं २५० मिलीलीटरपरिमितानां कतीनां कूपीनाम् आवश्यकता भविष्यति ?

**शिक्षक-निर्देशः –** शिक्षकः विभिन्नानाम् आकृतिमतां पात्राणां धारितायाः विषये ज्ञातुं सहभागिनः प्रेरयेत् । कक्षायां तान् पृच्छेत् यत् लघु-आकृतिमन्ति दीर्घ-आकृतिमन्ति च पात्राणि कुत्र दृष्टवन्तः इति । मिलीलीटर (मि.ली.) एवं च लीटर (ली.) इति मापनस्य चिह्नम् अस्ति । कस्यचित् पात्रस्य धारिता एतत् सूचयति यत् तस्मिन् पात्रे कियान् द्रवपदार्थः आगच्छति । लघुपात्राणां मिलीलीटरमाध्यमेन एवं च दीर्घपात्राणां लीटरमाध्यमेन मापनं क्रियते । १ लीटर = १००० मि.ली. भवति ।

■ सहायताशिविरे चिकित्सकः कस्मैचित् रोगिणे १८० मि.ली. परिमितां युक्ताम् औषधकूपीं दत्तवान्। एवं च सः प्रतिदिनं २० मि.ली. परिमितम् औषधं पातुम् उक्तवान् । रोगी कतीनां दिनानाम् औषधं प्राप्तवान् ?




■ प्लावनसमये सङ्क्रामकरोगम् अवरोद्धुं कश्चित् चिकित्सागणः टीकाकरणार्थं ग्रामः प्राप्तः । चिकित्सागण १०० मि.लीटरपरिमितां १० औषधकूपीं नीत्वा गतवान् । टीकाकरणे एकस्य जनस्य कृते ५ मि.लीटरपरिमितायाः कूप्याः आवश्यकता भवति। १ लीटरपरिमित-औषधकूप्या कतीनां जनानां टीकाकरणं भविष्यति ?

